# टिळक महाराष्ट्र विद्यापीठ, पुणे

**22R**

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : मे – २०२४**

**सत्र ४ थे**

**विषयः ऐतिहासिक काव्ये** (22R445)

| दिनांक : २७/०५/२०२४ | गुण : ६० | वेळ : दु. २.०० ते ४.३० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. एकस्य अनुवादं माध्यमभाषया लिखत।** (१०)

१. आस्थानगतश्च सहसैव प्रविशन्तम्, अनुप्रविशता विषण्णवदनेन लोकेनानुगम्यमानम्, असह्यदुःखोष्णनिःश्वासधूमरक्ततन्तुनेव मलिनेन पटेन प्रावृत्तवपुषम्, जीवितधारणलज्जयेवावनतमुखं, नासावंशस्याग्रे ग्रथितदृष्टिं, दुःखदूरप्ररूढरोम्णा मूकेनापि मुखेन स्वामिव्यसनम् अविच्छिन्नैः अश्रुबिन्दुभिः विज्ञापयन्तं, कुन्तलं नाम बृहदश्ववारं, राज्यवर्धनस्य प्रसादभूमिमभिमभिज्ञाततमं ददर्श।

२. मम हि भूभृति पर्यस्ते निरवशेषतः प्रस्रवणानीव स्रुतान्यश्रूण्यस्तमिते महति तेजस्यन्धकारीभूत–दशाशस्य प्रनष्टः प्रज्ञालोकः प्रज्वलितं हृदयम्, आत्मदाहभीत इव स्वप्नेऽपि नोपसर्पति विवेकः बलीयसा सन्तापेन जातुषमिव विलीनमखिलं धैर्यं, पदे पदे दिग्धरोषाहतेव हरिणी मुह्यति मतिः, पुरुषद्वेषिणीव दूरत एव भ्रमति परिहरन्ती स्मृतिः, अम्बेव तातेनैव सह गता धृतिः, वार्धुषिक प्रयुक्तानीव धनानीव प्रतिदिवसं वर्धन्ते दुःखानि, शोकानलधूमसम्भारसम्भूताम्भोधर भरितमिव वर्षति नयनवारिधारविसरं शरीरम्।

**प्र.२.** अ) टिप्पणीद्वयं लिखत।(३तः२) (२०)

१. राज्यवर्धनस्य कोपः २. अशौचदिवसाः

आ) ससन्दर्भं स्पष्टीकरणं लिखत।(३तः२)

१. स्त्रियो हि विषयः शुचाम्। २. अकाशताकाशे शशाङ्कमण्डलम्। (१०)

३ स्कन्दगुप्तो विवेश राजकुलम्।

**प्र.३. श्लोकद्वयमनुवदत।** (३तः२) (१०)

१. कोङ्कणेषु यदादिष्टचण्डदण्डाम्बुवीचिभिः।
उदस्तास्तरसा मौर्यपल्वलाम्बुसमृद्धयः।।

२. नळमौर्यकदम्बकाळरात्रिस्तनयस्तस्य बभूव कीर्तिवर्मा।
परदारनिवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्रियानुकृष्टा।।

३. पृथिवीवल्लभशब्दो येषामन्वर्थतां चिरञ्जातः।
तद्वंशे(श्ये)षु जिगीषुषु तेषु बहुष्वप्यतीतेषु।।

**प्र.४. अ) टिप्पणीं लिखत (२तः१)** (०५)

१. ऐहोळेप्रशस्तौ कालनिर्देशः। २. राजशक्तयः।

**आ) स्पष्टीकरणं लिखत।** (२तः१) (०५)

१. निजमतनु राज्यं जीवितं चोज्झति स्म।

२. प्रकारान्तरितप्रतापमकरोद्यः पल्लवानां पतिम्।

----------